**सप्तन्** पु॰ त्रि॰ । सप–तनिन् । (सात) १संख्यान्विते २तत्सं-ख्यायां महाभाष्यम् । [पृ॰ दृश्यम् ।

**सप्तनाड़ीचक्र** न॰ वृष्टिज्ञानार्थे चक्रभेदे चक्रशब्दे २८३१

**सप्तनामा** स्त्री सप्त नामानि यस्याः डाप् । आदित्यभक्तायाम् राजनि॰ । [राजनि॰ । २सप्तच्छदवृक्षे च ।

**सप्तपत्त्र** पु॰ सप्त सप्त पत्त्राणि प्रतिपत्त्रं यस्य । १सुद्गरवृक्षे

**सप्तपदी** स्त्री सप्तानां पदानां समाहारः ङीप् । विवाह-काले मण्डलिकासु गन्तव्येषु सप्तसु पदेषु । तत्प्रकारो भवदेवभट्टोक्तो यथा "ततो जामाता प्रागुदीचीं गत्वा वधूं सप्तभिर्मन्त्रैः सप्तसु मण्डलिकासु सप्त पदानि नयेत् । वधूञ्च दक्षिणपादं नीत्वा पश्चात् वामपादं मण्डलिकां नयेत् । जामाता च वधूं ब्रूयात् वामेन पादेन दक्षिणं पादमाक्रमयेति" इत्यादि । अस्यैव कर्मणो विवाहनिष्ठा-करत्वमुक्तं मनुना "पाणिग्रहणिकामन्त्रा नियतं दार-लक्षणम् । तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे"।

**सप्तपर्ण** पु॰ सप्त सप्त पर्णान्यस्य प्रतिपर्वम्। (छातिम) वृक्षे अमरः । "सप्तपर्णो व्रणश्लेष्मवातकुष्ठास्रजन्तुजित् । दी-पनः श्वासगुल्मघ्नः स्निग्धोष्णस्तुवरः स्मृतः" भावप्र॰ तद्गुणा उक्ताः । २लज्जालुलतायां स्त्री रत्नमा॰ङीप् । "द्राक्षादाड़िमखर्जूरस्फटिताम्रं सशर्करम् । लाजाचूर्णं समध्वाज्यं सप्तपर्णमुदाहृतम्" शब्दच॰ उक्ते ३खा-द्यभेदे न॰ ।

**सप्तपाताल** न॰ समाहारद्विगुः पात्रादि । "अतलं वितल-ञ्चैव नितलञ्च गभस्तिमत् । महातलञ्च सुतलं पातालं सप्त कीर्त्तितम्" इत्युक्तेषु सप्तसु भूमेरधःस्थलोकेषु ।

**सप्तप्रकृतिविकृति** स्त्री ब॰व॰सप्तसंख्याताः प्रकृतिविकृतयः। सांख्यसिद्धे महदहङ्कारसहितसूक्ष्मपञ्चभूतहेतुशब्दादि-तन्मात्रात्मके पदार्थसप्तके "महदाद्याः प्रकृतिविकृतयः सप्त" इति सांख्यकारिका । षोडशकपदार्थहेतुत्वात् प्रकृतित्वम् प्रकृतिकार्य्यत्वाच्च विकृतित्वमासाम् ।

**सप्तभद्र** पु॰ सप्तसु स्थानेषु भद्रमस्य । शिरीषवृक्षे शब्दच॰ ।

**सप्तम** त्रि॰सप्तानां पूरणः मट् । येन सप्तसंख्या पूर्य्यते तस्मि-न्नर्थे स्त्रियां ङीप् । सा च चन्द्रस्य सप्तमकलाया ह्रा-सवृद्धिरूपायां तिथौ च तिथिशब्दे ३२८५पृ॰ दृश्यम् ।

**सप्तरक्त** पु॰ सप्त रक्तानि प्रशस्तान्यस्य । "पाणिपादतले रक्ते नेत्रान्तरनखानि च । तालुकाधरजिह्वाश्च प्रशस्ता सप्त-रक्तता" इत्युक्तस्थानेषु रक्ततावति जने ।

**सप्तर्षि** पु॰ ब॰व॰ । सप्त ऋषयः संज्ञात्वात् कर्म॰। "मरीचि-रत्रिः पुलहः पुलस्त्यः क्रतुरङ्गिराः । वशिष्ठश्च महा-भाग ! सप्तैते ब्रह्मणः सुताः" इत्युक्तेषु सप्तसु ऋषिषु । मन्वन्तरभेदे तेषां नामभेदा ऋषिशब्दे उक्ता १४५२ पृ॰ दृश्याः ।

**सप्तर्षिमण्डल** त्रि॰ ६त॰ । आकाशे नित्यं ध्रुवनक्षत्रपरि-भ्रमके नक्षत्रसप्तकात्मके नक्षत्रमण्डलभेदे "सप्तर्षिमण्डलं तस्मादृश्यते सर्वकोपरीति" पुराणम् । तच्चारादि ऋषिशब्दे १४५२ पृ॰ दृश्यम् ।

**सप्तला** स्त्री सप्तधा लाति ला–क । १नवमालिकायाम् अमरः २चर्मकषायां ३गुञ्जायां ४पाटलायाञ्च मेदि॰ ।

**सप्तशती** स्त्री सप्तानां शतानां समाहारः । मार्कण्डेयपुरा-णान्तर्गतसप्तशतमन्त्रसमुदायरूपे देवीमाहात्म्यबोधके त्रयो-दशाध्यायात्मके ग्रन्थभेदे तन्मन्त्रविभागः चण्डीशब्दे २८५५ पृ॰ दृश्यः । "मध्ये सप्तशतीं जपेदिति" तत्र दर्शितवाक्यम् ।

**सप्तशलाक** पु॰ सप्त शलाकाकारा रेखा यत्र । ज्योतिषोक्ते विवाहादौ वर्ज्यदोषसूचके सप्तशलाकाकारितचक्रभेदे चक्रशब्दे२८३०पृ॰दृश्यम् । उपयमशब्दे१२६२पृ॰दृश्यम् ।

**सप्तशिरा** स्त्री सप्त शिरा अस्याः । ताम्बूलवल्ल्यां राजनि॰

**सप्तसप्ति** पु॰ सप्त सप्तयोऽश्वा यस्य । १सूर्ये हेमच॰ २अर्क-वृक्षे च । सप्ताश्वादयोऽप्यत्र ।

**सप्तसागर** पु॰ ब॰व॰ । सप्तसंख्याताः सागराः । "नवनीत-सुरासर्पिर्दधिदुग्धजलान्तका" इत्युक्तेषु सप्तसु सागरेषु सप्त घृतादिकल्पिताः सागरा इव देयपदार्था यत्र कप् । मत्स्यपुराणोक्ते स्वनामख्याते महादानभेदे मत्स्यपु॰ २८६अ॰ तद्विधानं दृश्यम् ।

**सप्तांशु** पु॰ सप्त अंशवो ज्वाला यस्य । सप्तजिह्वशब्दे "काली क-राली चेत्याद्युक्तसप्तज्वालायुते वह्नौ । [ग्रहे जटा॰ ।

**सप्तांशुपुङ्गव** पु॰ सप्तभिरंशुभिः पुङ्गव इव श्रेष्ठत्वात् । शनि-

**सप्तार्चिस्** पु॰ सप्त अर्चींषि यस्य । १वह्नौ अमरः २चित्रक-वृक्षे ३शनिग्रहे हेमच॰ । ४क्रूरनेत्रे त्रि॰ मेदि॰ ।

**सप्ताश्व** पु॰ सप्त अश्वा अस्य । १सूर्ये २अर्कवृक्षे अमरः ।

**सप्ताश्ववाहन** पु॰ सप्त अश्वाः वाहनान्यस्य । १सूर्ये २अर्क-वृक्षे च "शुचिः सप्ताश्ववाहनः" सूर्यस्तवः ।

**सप्ति** पु॰ सप–ति । अश्वे अमरः ।

**सफर** पुंस्त्री॰ सप–अरन् पृषो॰ पस्य फः । (पुँटी) मत्स्ये स्त्रीत्वे ङीष् । "त्यजन्ती चलशफरीविघट्टितोरुः" माघः अस्य तालव्यादितेत्यन्ये ।